नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – **30**

No. of Printed Pages – **4**

# VU-94-Sans. Vangmay

## संस्कृत वाङ्मय (अनिवार्यः)

**वरिष्ठ उपाध्याय परीक्षा, 2020**

**समय : 3¼ घण्टे**

**पूर्णांक : 80**

परीक्षार्थिभ्यः सामान्यनिर्देशाः

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्काः अनिवार्यतः लेख्याः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीयाः ।

(5) सर्वे प्रश्नाः संस्कृतमाध्यमेन उत्तरणीयाः ।

1. 'गार्ग्यः' इत्यत्र कः प्रत्ययः ? 1

2. 'ग्रामजनबन्धुभ्यस्तल्' इति सूत्रस्योदाहरणं लिखत । 1

3. परिणीतास्त्रियः द्वे नामनी लिखत । 1

4. पितुः द्वे नामनी लिखत । 1

5. भगिन्याः द्वे नामनी लिखत । 1

6. पति-पत्न्योः मातुः नाम किम् ? 1

7. समग्राकाशमण्डले भचक्रे कति नक्षत्राणि विद्यन्ते ? 1

8. नन्दा तिथयः काः ? ताः लिखन्तु । 1

9. एकस्मिन् मासे कति पक्षाः भवन्ति ? 1

10. अश्विनी नक्षत्रस्य चरणाक्षराणि लिखत । 1

11. श्रीमदम्बिकादत्तव्यासस्य संक्षिप्त-परिचयः प्रदेयः । 2

12. शिवराजविजयस्य काव्यगतसौष्ठवं स्पष्टयत । 2

13. नीतिशतककर्तुः संक्षिप्त-परिचयः प्रदेयः । 2

14. अधोलिखितस्य पद्यांशस्य भावार्थो लेख्यः – 2
    दुर्जनः परिहर्तव्यो विद्ययाऽलङ्कृतोऽपि सन् ।
    मणिना भूषितः सर्पः किमसौ न भयङ्करः ।।

15. स्त्रियः चत्वारि नामानि लेखनीयानि । 2

16. कति ऋतवः ? तेषां नामानि लेखनीयानि । 2

17. रेखाङ्कितपदे अशुद्धिसंशोधनं कुरुत – 1 + 1 = 2

(i) रामः पादात् खञ्जः अस्ति ।

(ii) कृष्णः विद्यालयेन गृहं गच्छति ।

18. कस्यचिदेकस्य गद्यांशस्य सप्रसङ्ग–व्याख्या विधेया – 1 + 2 = 3

(i) ततः संवृते किञ्चिदन्धकारे धूप–धूमेनेव व्याप्तासु हरित्सु भुशुण्डीं स्कन्धे निधाय निपुणं निरीक्षमाणः, आगत–प्रत्यागतञ्च विदधानः, प्रतापदुर्ग – दौवारिकः, कस्यापि पादक्षेपध्वनिमिवाऽश्रौषीत् ।

(ii) "त्यज, नाहं पुनरायास्यामि, नाहं पुनरेवं कथयिष्यामि, महाशयोऽसि दयस्व दयस्व" इति सहस्रधा समचकथत्, तथापि दौवारिकस्तु तमाकृष्य नयन्नेव प्रचलितः ।

19. दौवारिकं परीक्षितुं गौरसिंहः किं कृतवान् ? 3

20. कस्यचिदेकस्य पद्यांशस्य सप्रसङ्ग–व्याख्या विधेया – 1 + 2 = 3

(i) भवन्ति नम्रास्तरवः फलोद्गमै –
नर्वाम्बुभिर्दूरविलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः,
स्वभाव एवैष परोपकारिणाम् ।।

(ii) पापान्निवारयति, योजयते हिताय,
गुह्यं निगूहति, गुणान्प्रकटीकरोति ।
आपद्गतं च न जहाति, ददाति काले,
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ।।

21. सेवाधर्मः कीदृशोऽस्ति ? स्पष्टयत । **3**

22. केषाञ्चित् **त्रयाणां** वाक्यानां संस्कृतभाषायामनुवादो विधेयः – **$3 \times 1 = 3$**
   (i) रमा से श्यामा छोटी है ।
   (ii) कुश के साथ लव आया ।
   (iii) विद्वान् की सभी जगह पूजा होती है ।
   (iv) जटाओं से तपस्वी प्रतीत होता है ।
   (v) संस्कृत भाषा भारत की प्रतिष्ठा है ।

23. कयोश्चिद् **द्वयोः** सूत्रयोः व्याख्या कार्या – **$2 \times 2 = 4$**
   (i) तिङ्शित्सार्वधातुकम् (ii) अतो दीर्घो यञि (iii) स्यतासी लृलुटोः

24. कयोश्चिद् **द्वयोः** सूत्रयोः व्याख्या कार्या – **$2 \times 2 = 4$**
   (i) राष्ट्राऽवारपाराद् घखौ
   (ii) दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः
   (iii) अत इञ्

25. कयोश्चिद् **द्वयोः** चत्वारः पर्यायाः लेखनीयाः – **$2 \times 2 = 4$**
   (i) पुत्री (ii) मुखम् (iii) केशः

26. कयोश्चिद् **द्वयोः** नामानि लेखनीयानि – **$2 \times 2 = 4$**
   (i) नवग्रहाः (ii) करणानि (iii) मासाः

27. कमपि **एकं** विषयमवलम्ब्य निबन्धं लिखत : (150 शब्दैः) **5**
   (i) संस्कृतभाषायाः महत्त्वम् (ii) सत्सङ्गतिः (iii) परोपकारः
   (iv) मम प्रियः कविः

28. अधोलिखितेषु केऽपि **त्रयः** प्रयोगाः साधनीयाः **$3 \times 2 = 6$**
   आश्वपतम्, दाधिकम्, औपगवः, पाणिनीयम्, शाब्दिकः ।

29. अधोलिखितेषु केऽपि **त्रयः** प्रयोगाः साधनीयाः **$3 \times 2 = 6$**
   भवन्ति, बभूव, अभवत्, भविष्यतः, भविता ।

30. अधोलिखितेषु केऽपि **चत्वारः** प्रयोगाः साधनीयाः – **$4 \times 2 = 8$**
   सार्वभौमः, गोत्वम्, तारकितः, कुत्र, लघिष्ठः, कुतः ।

---